क्रं. ५५

संस्कृत.

सत्य नारायण व्रत
पूजा.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१)

# ॥ अथसत्यनारायणव्रतपूजारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

सत्यना
१
(2)

श्रीगणेशायनमः अथसत्यनारायणपूजा
अथस्कंदपुराणांतर्गतरेवाखंडस्थसत्यना
रायणव्रतविधिर्लिख्यते संक्रांतौपौर्णमास्यां
वायस्मिन्कस्मिन्शुभदिनेवाउपवासपूर्वकं
सायंकालेस्नात्वासायंसंध्यांविधायइक्षुकं
दलीस्तंभरंगवल्यादिअलंकृतेपूजास्थानेसप
त्नीकउपविश्याचम्यपवित्रेधृत्वाप्राणानाय
म्यदेशकालौसंकीर्त्यअमुकगोत्रोत्पन्नस्य
अमुकशर्मणःममसकलपापक्षयपूर्वकश

राम
१

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

त्रुपराजयस्थिरलक्ष्मीपुत्रपौत्रादिसंततिप्रा
प्तिसमस्तरोगपीडापरिहारपूर्वकसकलमनो
रथप्राप्तिद्वारा अंते विष्णुलोकप्राप्त्यर्थं श्रीसत्य
नारायणप्रीत्यर्थं यथामीलितोपचारैः पूजनम
हं करिष्ये आदौ निर्विघ्नतासिद्ध्यर्थं महागण
पतिपूजनं करिष्ये आसनविधिपूर्वकं पुरुषसू
क्तन्यासांश्च करिष्ये कलशपूजनं शंखपूजनं
घंटापूजनं च करिष्ये शंखोदकेन पूजासाम
ग्रीं प्रोक्ष्य आत्मानं प्रोक्षेत् गणानांत्वा शौन

(3)

सप्तना० कोगृत्समदोगणपतिर्जगती गणपत्यावाहनेविनि
२ योगः ॐ गणानांत्वागणपतिंहवामहेकविंकवी
नामुपमश्रवस्तमं। ज्येष्ठराजंब्रह्मणांब्रह्मणस्पत
आनःश्रृण्वन्नूतिभिःसीदसादनं।। ॐभूर्भुवस्वः
अस्मिन्पूगीफलेमहागणपतिंसांगंसपरिवारंसा
युधंसशक्तिकंऋद्धिबुद्धिसहितंआवाहयामि ॐ
भूर्भुवःस्वः महागणपतयेनमः ध्यायामि ॐमहा०
आसनं० मंत्रपुष्पांतं० ॐनिषुसीदगणपतेगणेषु राम
त्वामाहुर्विप्रतमंकवीनां। नऋतेत्वत्क्रियतेकिंच २

(3A)

नारेमहामर्कमघवन्वित्रमर्च ॥ मंत्रपुष्पं स० कार्यंमे
सिध्दिमायातु प्रसन्नेत्वयिधातरि विघ्नानिनाशमायांतु
तु सर्वाणि सुरनायक ॥ अनयापूजयासकलविघ्नापहर्ता
महागणपतिःप्रीयतां ॥ ॐ महीद्यौः ए० ॐ ओषधयः
संवदंते० धान्यराशिंकृत्वा ॐ आकलशेषु० कलशांसंस्था
प्य ॐ इमंमेगंगेइतिज[illegible]पूर्य ॐ गंधद्वारांदुराधर्षां
मितिगंधं ॐ कांडात्कांडात्प्ररो० दूर्वानि० ॐ अश्वत्थेव
इतिपंचपल्लवान् ॐ याःफलिनीरितिफलं ॐ सहि
रत्नानि इतिपंचरत्नानि ॐ हिरण्यरूपइतिहिरण्यं ॐ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सत्यना॰ सुवासुवासाः॰इतिवस्त्रं॰ॐ पूर्णादर्विपरापत॰पूर्णपा
२ त्रं निधाय ॐ तत्वायामिब्रह्मणा॰वरुणमावाह्य त
सुरतउदक्संखं गणपतिं दुर्गां क्षेत्रपालं वास्तोष्प
तिं पूगीफलेष्वावाह्य तत्पुरत आदित्यादिनवग्रहा
न् उदक्संखान्पूगीफलेष्वावाह्य परितः पूर्वादिक्रमे
ण इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं सोमं ईशा
नं इतिलोकपालान आवाह्य पूजांकुर्यात स्त्रीक राम
र्तृकव्रते सत्यनारायणं सुवर्णप्रतिमायांप्राणप्रतिष्ठा ३

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1A)

पूर्वकं आवाह्य वेदमंत्रवर्ज्यं वक्ष्यमाणपौराणमंत्रैः पू
जनं कुर्यात् अथ ध्यानं ध्यायेत्सर्वगुणोपेतं सत्य
नारायणं हरिं चतुर्बाहुं त्रिलोकेशं शंखचक्रगदाधरं ॥
नीलवर्णं पीतवस्त्रं श्रीवत्सपदभूषितं कौस्तुभाभरणं
देवं लक्ष्मीवंतं वरप्रदं श्रीसत्यनारायणाद्यावाहितदे
वताभ्यो नमः ध्यानं ॐ सहस्रशीर्षा० आगच्छकम
लाकांत कृपया भक्तवत्सल पूजां गृहाण देवेश सर्वसं
पत्प्रदो भव श्रीसत्यनारा० आवाहनं स० ॐ पुरुषए
वेदं० कार्तस्वरमयं दिव्यं नानारत्नविभूषितं आसनं क

A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

सत्यना० ४

ल्पितं भक्त्या गृह्यतां परमेश्वर श्रीसत्य० आसनं० ॐ
एतावानस्य० नारायण नमस्तेस्तु नरकार्णवतारक पा
द्यं गृहाण देवेश मम सौख्यं प्रवर्धय श्रीसत्यनारा० पा
द्यं स० ॐ त्रिपादूर्ध्व० व्यक्ताव्यक्तस्वरूपाय हृषीकेशा
य ते नमः मया निवेदितं भक्त्या गृहाणार्घ्यं नमोस्तु ते
श्री सत्य० अर्घ्यं स० गंगाजलं समानीतं कर्पूरेण स
मन्वितं आचम्यतां सुरश्रेष्ठ नारायण जगत्पते श्रीस
त्य० आचमनीयं० ॐ तस्माद्विराळ० आचम० ॐ यत्पु
रुषेण० गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं तो

राम ४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

(5A)

यमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यतां श्रीसत्स०
स्नानं स० पंचामृतस्नानं ॐ आप्यायस्वसमे० का
मधेनुसमुद्भूतं दुग्धं चामृतमुत्तमं स्नानार्थं नेमय
छामिगृह्यतां परमेश्वर श्री स० पयस्नानं० ॐ दधि
क्राव्णो० गोदुग्धविकृतं देवदधिरूपं सुनिर्मलं स्ना
नार्थं तेमयच्छामिगृह्यतां परमेश्वर श्रीस० दधिस्ना
नं० गोघृतं चमयानीतं देवानां हविरुत्तमं पावनं स
र्वलोकानां स्नानार्थं प्रतिगृह्यतां ॐ घृतं मिमिक्षे०
घृतस्नानं स० ॐ मधुवाताऋतायते० पुष्पेभ्यः सारमा

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

सत्यना० दायमक्षिकाभिः कृतं मधु स्नानार्थं ते प्रयच्छामि गृह्यतां
५ सुरनायक श्रीस० मधुस्नानं० ॐ स्वादुः पवस्व दिव्याय०
शर्करां च सितां शुभ्रां इक्षुसारसमुद्भवां स्नानार्थं ते प्रय
च्छामि गृहाण त्वं जगत्पते श्रीसत्य० शर्करास्नानं० देवदेव
रमाकांत नारायण जगत्पते गंधोदकं प्रयच्छामि स्नाना
र्थं प्रतिगृह्यतां गंधद्वारां० श्रीसत्य० गंधोदकस्नानं०
कनिक्रदज्जनुषं प्रब्रुवाणः० तैलं सुगंधसंयुक्तं नानापु
ष्पैः समन्वितं मंगलार्थं प्रयच्छामि अभ्यंगं प्रतिगृह्य राम
तां श्रीसत्य० अभ्यंगस्नानं० पंचोपचारैः संपूज्य पु ५

" Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6A)

रुषसूक्तेनमहाभिषेकंकुर्यात् ॐतंयज्ञंबर्हि० कार्पास
सूत्ररचितंपीतवस्त्रंसुशोभनं मयानिवेदितंभक्त्यागृह्य
तांपरमेश्वर श्रीस० वस्त्रं० ॐतस्माद्य० संभृतं० उपवीतं
सोत्तरीयंमयादत्तंसुशोभनं विश्वमूर्तेगृहाणेदंसत्यनारा
यणप्रभो श्रीसत्य० यज्ञोपवीतं० कस्तूर्यगुरुसंयुक्तंसु
गंधिंसुमनोहरं विलेपनंसुरश्रेष्ठ चंदनंप्र० ॐतस्माद्यज्ञा०
ऋचः सामा० श्रीसत्य० चंदनंस० अक्षतान्धवलान्दिव्यान्सु
कामणिसमप्रभान् प्रीत्यर्थंतेप्रदास्यामिसत्यनाराय
णप्रभो श्रीस० अक्षतान्० सुगंधद्रव्यंस० ॐतस्माद्

...Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सत्यना० २वा० माल्यादीनि० पुष्पाणि स० अथांगपूजा ॐ सत्यना
६ रायणाय० पादौ पू० गुणप्रदाय० गुल्फौ पू० नारायणाय०
नखान् पू० जनार्दनाय० जानुनी पू० जगन्नाथाय० जंघे पू०
उपेंद्राय० ऊरू पू० मेघश्यामाय० मेढ्रं पू० कमलापतये० क
टिं पू० गोविंदाय० गुह्यं पू० पद्मनाभाय० नाभिं पू० दामोद
राय० उदरं पू० चक्रहस्ताय० हस्तं पू० चतुर्बाहवे० बाहू पू०
श्रीवत्सवक्षसे० हृदयं पू० कंबुकंठाय० कंठं पू० वाचस्पतये०
मुखं पू० कमलाक्षाय० नेत्रे पू० लक्ष्मीपतये० ललाटं पू० सह राम
स्रशिरसे० शिरः पूजयामि श्रीसत्यनारायणायनमः सर्वांगं पू० ६

Joint pro... the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

ॐ यत्पुरुषं व्य० वनस्पतिरसोद्भू० श्रीसत्य० धूपं स० ॐ
ब्राह्मणोस्य० आज्यं च वर्ति० श्रीसत्य० दीपं स० ॐ चंद्र
मा मनसो जा० घृतपक्वं शर्करा दध्येह विष्यान्नं पायसं च ॥
नानाविधफलैर्युक्तं नैवेद्यं प्रतिगृह्यतां श्रीसत्य० नैवेद्यं०
सर्वपापहरं दिव्यं गांगेयं निर्मलं जलं नैवेद्यमध्ये पा
नीयं गृह्यतां परमेश्वर मध्ये पानीयं० उत्तरापोशनं०
हस्तप्रक्षालनं० मुखप्रक्षालनं० करोद्वर्तनार्थे चंदनं स०
ॐ नाभ्या आसीदंत० पूगीफलं महद्दिव्यं नागवल्ल्या
दलैर्युतं कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यतां श्रीस

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(४)

सत्यना० त्स० तांबूलंस० ॐ सप्तास्यासन्परि० हिरण्यगर्भगर्भ
७ स्थं हे० दक्षिणांस० इदं फलं मयादेव० श्रीसत्य० फलंस०
ॐ श्रियेजात: श्रियआनिरियाय० श्रीसत्य० महानीरा
जनंस० कदलीजलसंभूतं कर्पूरंविहितंयुतं नीराजनंनि
रीक्षस्वनारायणजगत्पते श्रीसत्य० कर्पूरदीपंस० ॐ
यज्ञेनयज्ञम० नानाविधानिपुष्पाणिस्वहस्तेनाहृतानिच॥
पुष्पांजलिंप्रयच्छामिगृहाणसुरपूजित श्रीसत्य० मंत्र
पुष्पंस० यानिकानिचपापानि० प्रदक्षिणांस० जनार्दनं राम
जनातीतंसत्यनारायणंहरिं प्रणमामिसदाभक्त्यासर्व ७

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8A)

संपत्प्रदायक श्रीसत्य० नमस्कारान्समर्पयामि ॥ अथ प्रार्थना ॥ य
न्मया भक्तियुक्तेन पत्रं पुष्पं फलं जलं निवेदितं च नैवेद्यं
तद्गृहाणानुकंपया श्रीस० प्रसन्नार्घ्यं स० गुणत्रयं गुणा
तीतं गोविंदं गरुडध्वजं जनार्दनं जनातीतं जानकीवल्ल
भं हरिं अमोघं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं हृषीकेशं
जगन्नाथं वागीशं वरदायकं प्रणमामि सदा भक्त्या ना
रायणमजं परं दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते
आपत्कालेषु सर्वेषु वाताग्निजलसंकटे नामान्येतानि
संकीर्त्य न तेभ्यो भयमाप्नुयात् सत्यनारायणो देवो वद

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(१)

सत्यना० कामफलप्रदः येनेदंरचितंविश्वं तस्मैसर्वात्मनेनमः य
८ स्यस्मृत्याचनामोक्त्या० आवाहनं० मंत्रहीनंक्रिया० अ
नेनयथाज्ञानेनकृतपूजनेनश्रीसत्यनारायणदेवता:
प्रीयंतां अनंतरंसुहृद्बांधवैःसह कथांश्रुत्वाऽनंतरंक
थांश्रुत्वाऽनंतरंउत्तरपूजांकृत्वा आचार्यायदक्षिणा
दानंपीठदानंचकृत्वाब्राह्मणैःसुहृद्भिर्बांधवैःसहभुं
जीत सत्यनारायणव्रतपूजासमाप्ता नैवेद्यपदार्थ
सांजा केळी साखर तूप दूध सर्वजिंनससपादप्रमा राम
णअसावे प्रसादसर्वांसद्यावा नारायणभट्टपरांजपे ८

श० १८२०

शके १८२०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com